Mantra Pushpam

मन्त्रपुष्पम्

MANTRA · मन्त्रपुष्पम् (तै. आ. १.२२)

1 ॐ॥ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति।
चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति। य एवं वेद।

2 योऽपामायतनं वेद। आयतनवान् भवति। अग्निर्वा अपामायतनम्।
आयतनवान् भवति।
योऽग्नेरायतनं वेद॥ आयतनवान् भवति। आपो वा अग्नेरायतनम्।
आयतनवान् भवति। य एवं वेद।

3 योऽपामायतनं वेद। आयतनवान् भवति। वायुर्वा अपामायतनम्। आयतनवान् भवति।
यो वायोरायतनं वेद। आयतनवान् भवति॥ आपो वै वायोरायतनम्।
आयतनवान् भवति। य एवं वेद।

4 योऽपामायतनं वेद। आयतनवान् भवति। असौ वै तपन्नपामायतनम्।
आयतनवान् भवति।
योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति। आपो वा अमुष्य तपत
आयतनम्॥ आयतनवान् भवति। य एवं वेद।

5 योऽपामायतनं वेद। आयतनवान् भवति। चन्द्रमा वा अपामायतनम्।
आयतनवान् भवति।
यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति। आपो वै चन्द्रमस आयतनम्।
आयतनवान् भवति॥ य एवं वेद।

6 योऽपामायतनं वेद। आयतनवान् भवति। नक्षत्राणि वा अपामायतनम्।
आयतनवान् भवति।
यो नक्षत्राणामायतनं वेद। आयतनवान् भवति। आपो वै नक्षत्राणामायतनम्।
आयतनवान् भवति। य एवं वेद॥

7 योऽपामायतनं वेद। आयतनवान् भवति। पर्जन्यो वा अपामायतनम्।
आयतनवान् भवति।
यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति। आपो वै पर्जन्यस्याऽऽयतनम्।
आयतनवान् भवति। य एवं वेद।

8 योऽपामायतनं वेद॥ आयतनवान् भवति। संवत्सरो वा अपामायतनम्।
आयतनवान् भवति।
यस्संवत्सरस्यायतनं वेद। आयतनवान् भवति। आपो वै संवत्सरस्यायतनम्।
आयतनवान् भवति। य एवं वेद।

9 योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥

MANTRA · राजाधिराजाय (तै. आ. १.३१.६)

10 ॐ राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे।
स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु।
कुबेराय वैश्रवणाय। महाराजाय नमः।

Text checked against: Mantrapushpam (Vedic mantras with svara), ed. Swami Devarupananda, Ramakrishna Math, Khar, Bombay; 4th edition (first edition December 1989 per the preface). Meanings, audio and all scripts at nityapaath.com/mantra-pushpam-full/